॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## षट्पदी

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# षट्पदी

अविनयमपनय विष्णो दमय, मनः(श्) शमय विषयमृगतृष्णाम्।
भूतदयां(म्) विस्तारय  तारय, सं(व्)सारसागरतः ॥ 1॥

दिव्यधुनीमकरन्दे परिमल-परिभोगसच्चिदानन्दे।
श्रीपतिपदारविन्दे भव-भयखेदच्छिदे वन्दे ॥ 2॥

सत्यपि भेदापगमे नाथ, तवाहं(न्) न  मामकीनस्त्वम्।
सामुद्रो हि तरंगः(ख्) क्वचन, समुद्रो न तारंगः ॥ 3॥

उद्धृतनग नगभिदनुज दनुज-कुलामित्र मित्रशशिदृष्टे।
दृष्टे भवति प्रभवति न भवति, किं(म्) भवतिरस्कारः ॥ 4॥

मत्स्यादिभिरवतारैरव-तारवताऽवता सदा वसुधाम्।
परमेश्वर परिपाल्यो भवता, भवतापभीतोऽहम् ॥ 5॥

दामोदर गुणमन्दिर सुन्दर-वदनारविन्द गोविन्द।
भवजलधिमथनमन्दर परमं(न्), दरमपनय त्वं(म्) मे ॥ 6॥

नारायण करुणामय शरणं(ङ्), करवाणि तावकौ चरणौ।
इति षट्पदी मदीये वदन-सरोजे सदा वसतु ॥ 7॥

॥ इति श्रीमच्छंकराचार्यविरचितं विष्णुषट्पदीस्तोत्रं सम्पूर्णम्॥